# Shri Shiva Stutih

# શ્રીશિવ સ્તુતિઃ

## Document Information

Text title : shivastutiH 13 parashurAmaBVP

File name : shivastutiHparashurAmaBVP.itx

Category : shiva

Location : doc_shiva

Author : Parashurama

Proofread by : PSA Easwaran

Description/comments : Brahmavaivartamahapurana, gaNapati khaNDa

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીશિવ સ્તુતિઃ

શ્રીપરશુરામ ઉવાચ -
ઈશ ત્વાં સ્તોતુમિચ્છામિ સર્વથા સ્તોતુમક્ષમઃ ।
અક્ષરાક્ષયબીજં ચ કિં વા સ્તૌમિ નિરીહકમ્ ॥ ૧॥

ન યોજનાં કર્તુમીશો દેવેશં સ્તૌમિ મૂઢધીઃ ।
વેદા ન શક્તા યં સ્તોતું કસ્ત્વાં સ્તોતુમિહેશ્વરઃ ॥ ૨॥

વાગ્બુદ્ધિમનસાં દૂરં સારાત્સારં પરાત્પરમ્ ।
જ્ઞાનમાત્રેણ સાધ્યં ચ સિદ્ધં સિદ્ધૈર્નિષેવિતમ્ ॥ ૩॥

યમાકાશમિવાઽદ્યન્તમધ્યહીનં તથાઽવ્યયમ્ ।
વિશ્વતન્ત્રમતન્ત્રં ચ સ્વતન્ત્રં તન્ત્રબીજકમ્ ॥ ૪॥

ધ્યાનાઽસાધ્યં દુરારાધ્યમતિસાધ્યં કૃપાનિધિમ્ ।
ત્રાહિ માં કરુણાસિન્ધો દીનબન્ધોઽતિદીનકમ્ ॥ ૫॥

અદ્ય મે સફલં જન્મ જીવિતં ચ સુજીવિતમ્ ।
સ્વપ્નેઽપ્યદૃષ્ટં ભક્તૈશ્ચાઽધુના પશ્યામિ ચક્ષુષા ॥ ૬॥

શક્રાદયઃ સુરગણાઃ કલયા યસ્ય સમ્ભવાઃ ।
ચરાચરાઃ કલાંશેન તં નમામિ મહેશ્વરમ્ ॥ ૭॥

સ્ત્રીરૂપં ક્લીવરૂપં ચ પૌરુષં ચ બિભર્તિ યઃ ।
સર્વાધારં સર્વરૂપં તં નમામિ મહેશ્વરમ્ ॥ ૮॥

યં ભાસ્કરસ્વરૂપં ચ શાશિરૂપં હુતાશનમ્ ।
જલરૂપં વાયુરૂપં તં નમામિ મહેશ્વરમ્ ॥ ૯॥

અનન્તવિશ્વસૃષ્ટીનાં સંહર્તારં ભયઙ્કરમ્ ।
ક્ષણેન લીલામાત્રેણ તં નમામિ મહેશ્વરમ્ ॥ ૧૦॥

॥ ફલશ્રુતિઃ ॥

ઇત્યેવમુક્ત્વા સ ભૃગુઃ પપાત ચરણામ્બુજે ।
આશિષં ચ દદૌ તસ્મૈ સમુત્પન્નો બભૂવ સઃ ॥ ૧૧॥

જામદગ્ન્ય કૃતં સ્તોત્રં યઃ પઠેદ્ભક્તિસંયુતઃ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકં સ ગચ્છતિ ॥ ૧૨॥

॥ ઇતિ શ્રી બ્રાહ્મે વૈવર્તે મહાપુરાણે ગણપતિ ખણ્ડે
શ્રીપરશુરામકૃત શ્રીશિવસ્તુતિઃ સમાપ્તા ॥

Proofread by PSA Easwaran

*Shri Shiva Stutih*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*